(दी. २६। प. १९। मा. १५) ७ (घु।२१३)

(३)

अधिप। ताइ। मित्रप। ताइ। क्षत्रप। ताइ। स्वःपताइ। धनपताऽ२इ। नाऽ२माः।

नमोन्नायनमोन्नपतयएकाक्षायचावपन्नादायचनमोनमः।

रुद्रायतीरसदेनमःस्थिरायस्थिरधन्वनेनमःप्रतिपदायचपटरिणेचनमस्त्रियंबकायचक।

पर्दिनेचनमआश्रायेभ्यश्चप्रत्याश्रायेभ्यश्चनमःक्रव्येभ्यश्चविरिम्फेभ्यश्चनमःसंवृतेचविवृतेच।

अवज्यामिवधन्वनोवितेमन्युन्नयामसिमृडतान्नइह॥ अस्मभ्यम्। इडाऽ२३भा॥

यइदंविश्वंभूतम्। युयोऽ३आउ। वाऽ२३॥ नाऽ२३४माः॥

(दी. ३५। प. १९। मा. १६) ८ (भू।२१४)

(१२८।१) ॥ ऋतुष्ठायज्ञायज्ञीयम्। प्रजापतिर्बृहत्यृतवः॥

वाऽ५सन्तः। ईऽ३न्नूऽ३रन्तायाः॥ ग्रीष्मइन्नुराऽ१न्तीऽ३याः। वर्षाण्यनुश्राऽ३। हिम्॥ राऽ३दाः॥

हेमन्तश्शिशिरइन्नुराऽ२न्तियाउ॥ वाऽ२३४५॥

(दी. ३। प. ८। मा. ८) ९ (डै।२१५)

(१२९।१) ॥ अजितस्य जितिस्साम। अजितो बृहतीन्द्रः प्रजापतिर्बृहतीन्द्रेशानौ॥

हाउ(३)। हुप्। (त्रिः)। बिबिबिबीऽ३। (त्रिः)। हीऽ२। (त्रिः)। हाउ(३)वा।

अभित्वाशूरनोनुमोहस्॥ अदुग्धाइवधेनवोहस्॥ ईशानमस्यजगतःस्वर्दृशꣳहस्॥

ईशानमिन्द्रतस्थुषोहस्। हाउ(३)। हुप्। (त्रिः)। बिबिबिबीऽ३। (त्रिः)। हीऽ२। (त्रिः)।

हाउ(३)वा॥ एअस्। एफट्। एमृस्। एहस्। ईऽ२३४५॥

(दी. २२। प. ३१। मा. २८) १० (च्रै।२१६)

(१३०।१) ॥ सोम व्रतम्। सोमस्त्रिष्टुप्सोमः॥

ईऽ२। (त्रिः)। सन्तेपया। सीऽ३समू। यन्तुवाजाः॥ संवृष्णिया। नीऽ३अभि। मातिषाहाः॥

आप्यायमा। नोऽ३अमृ। तायसोमा॥ दिविश्रवा। सीऽ३उत्त। मानिधिष्वा। ईऽ२। (द्विः)।

ईऽ२। आऽ२३४औहोवा॥ ह्॥

(दी. ११। प. २०। मा. ६) ११ (ङू।२१७)

(१३१।१) ॥ दीर्घतमसोऽर्कः। दीर्घतमास्त्रिष्टुप्सोमः सूर्यो वा॥

आयाउ। (त्रिः)। अक्रान्त्समूद्रःप्रथमाइविधर्मान्। विधर्मान्। (द्विः)।

जनयन्प्राजाभुवनास्यगोपाः। स्यगोपाः। (द्विः) वृषापावित्रेअधिसानोअव्याइ। नोअव्याइ।

(द्विः)। आयाउ। (त्रिः)। बृहत्सोमोवावृधेसुवानोअद्राइ। नोअद्राइ। नोअद्राऽ३१उवाऽ२३॥

एऽ३। धेस्वानोअद्रीऽ२३४५ः॥

(दी. २०। प. २०। मा. २८) १२ (मै।२१८)

॥ द्वादश पञ्चमः खण्डः॥५॥

(१३२।१) ॥ पुरुषव्रतानि पञ्च। पुरुषोऽनुष्टुप्पुरुषः॥

उहुवाहाउ। (त्रिः)। सहस्रशीर्षाःपुरूऽ२३षाः॥ सहस्राक्षःसहस्राऽ२३पात्॥

सभूमिꣳसर्वतोवाऽ२३र्त्वा॥ अत्यतिष्ठद्दशाङ्गूऽ२३लाम्। उहुवाहाउ। (द्विः)। उहुवाऽ३हाउ।

वाऽ३॥ इट्स्थि-इडाऽ२३४५॥

(दी. ६। प. १२। मा. १०) १३ (खौ।२१९)

(१३३।१)

उहुवौहोवाऽ२। (त्रिः)। त्रिपादूर्ध्वउदैत्पुरूऽ२३षाः॥ पादोस्येहाभवत्पूऽ२३नाः॥ तथाविष्वाङ्वियक्राऽ२३मात्॥ अशनानशनेआऽ२३भी। उहुवौहोवाऽ२। (द्विः)। उहुवौ। होऽ२। वाऽ२३४। औहोवा। ईऽ२३४डा। उहुवौहोवाऽ२। (द्विः)। उहुवौ। होऽ२। वाऽ२३४। औहोवा। सूऽ२३४वा। उहुवौहोवाऽ२। (द्विः)। उहुवौ। होऽ२। वाऽ२३४। औहोवा। ऊऽ२३४५॥

(दी. ३७। प. २८। मा. ६) १४ (र्जू।२२०)

(१३४।१)

इयौहोवाऽ२। (त्रिः)। पुरुषएवेदꣳसाऽ२३र्वाम्॥ यद्भूतंयच्चभावाऽ२३याम्॥ पादोस्यसर्वाभूताऽ२३नी॥ त्रिपादस्यामृतंदाऽ२३इवी। इयौहोवाऽ२। (द्विः)। इयौ। होऽ२। वाऽ२३४। औहोवा। ईऽ२३४डा। इयौहोवाऽ२। (द्विः)। इयौ। होऽ२। वाऽ२३४। औहोवा। ज्योऽ२३४तीः। इयौहोवाऽ२। (द्विः)। इयौ। होऽ२। वाऽ२३४। औहोवा॥ ईऽ२३४५॥

(दी. ३७। प. २८। मा. ५) १५ (ज्ञु।२२१)

(१३५।१)

हाउ(३)। तावानस्य। महाऽ२३इमाऽ३॥ हाउ(३)। ततोज्यायाꣳश्चपूरुऽ२३षाऽ३ः॥ हाउ(३)। उतामृतत्वस्येशाऽ२३नाऽ३ः॥ हाउ(३)। यदन्नेनातिरोहाऽ२३तीऽ३। हाउ(३)। वाऽ३। इट्स्थिइडाऽ२३४५॥

(दी. २३। प. १२। मा. ११) १६ (ठो।२२२)

(१३६।१)

हाउ(३)वा। ततोविराडजायत। हा(३)वा। विराजाअधिपूरुषः॥ हाउ(३)वा।

सजातोअत्यरिच्यत॥ हाउ(३)वा। पश्चाद्भूमिमथोपुरः। हाउहाउहाउवाऽ३॥ ईऽ२३४५॥

(दी. ११। प. १०। मा. १९) १७ (ङ्रो।२२३)

(१३७।१)॥ पुरुषव्रते द्वे, पश्चानुगानश्चैकानुगानश्च। पुरुषोगायत्रीश्वरपुरुषः, विश्वेदेवा वा। (तत्रेदं द्वितीयमेकानुगानम्)॥

हाउ(३)। अस्मीनस्मिन्। (त्रिः)। नृम्णाइनृम्णम्। (त्रिः)। निधाइमाहे। (त्रिः)।

कयानश्चित्रऽ३आभूऽ१वाऽ२त्॥ ऊतीसदावृऽ३धाःसाऽ१खाऽ२॥

कयाशचिष्ठऽ३यावाऽ१र्त्ताऽ२३॥ हाउ(३)। अस्मीनस्मिन्। (त्रिः)। नृम्णाइनृम्णम्। (त्रिः)।

निधाइमाहे। (द्विः)। निधाऽ२३इ। माऽ२। हाऽ२३४। औहोवा॥ सुवर्ज्योतीऽ२३४५ः॥

(दी. १४७। प. २७। मा. ३३) १८ (थि।२२४)

(१३८।१)॥ द्यावापृथिव्योः (द्यौर्व्रतम्)। द्यौःज्योतिष्मती जगती द्यावापृथिव्यौ॥

हुवाइ। (त्रिः)। रूपम्। मन्येवांद्यावापृथिवीसुऽ३भोजाऽ१साऽ२उ॥

येअप्रथेथाममितमाभिऽ३योजाऽ१नाऽ२म्॥ द्यावापृथिवीभवऽ३ताꣳस्योऽ१नाऽ२इ॥

तेनोमुञ्चतऽ३माꣳहाऽ१साऽ२ः। हुवाइ। (त्रिः)। रूपाऽ२। वाऽ२३४औहोवा॥ ए। रूपम्। (द्वे त्रिः)॥

(दी. २३। प. १९। मा. १६) १९ (द्रू।२२५)

(१३७।१)॥ त्रीणि लोकानां व्रतानि दिवोऽन्तरिक्षस्य पृथिव्याः। अन्तरिक्षं गायत्रीन्द्रः। (तत्रेदं द्वितीयमन्तरिक्षस्य व्रतमिति)॥

वाक्। (द्विः)। वागीयम्। कयानश्चित्रऽ३आभूऽ१वाऽ२त्॥ ऊतीसदावृऽ३धाःसाऽ१खाऽ२॥ कयाशचिष्ठऽ३यावाऽ१र्त्ताऽ२॥ वाक्। (द्विः)। वागीयाऽ२। वाऽ२३४औहोवा॥ ए। अन्तरिक्षेसलिलंल्लेलायाऽ२३४५॥

(दी. १३। प. १२। मा. ८) २० (ठै।२२६)

(१३८।१)॥ विपरीते द्वे, तत्र द्वितीयमिदं पृथिवीव्रतम्। पृथिवीज्योतिष्मतीजगतीद्यावापृथिव्यौ॥

प्रतिष्ठासिप्रति। ष्ठा। (द्वे त्रिः)। वर्चोसिमनोसिऐही। मन्येवांद्यावापृथिवीसुभोजसावैही॥ येअप्रथेथाममितमभियोजनामैही॥ द्यावापृथिवीभवतꣳस्योनाऐही॥ तेनोमुञ्चतमꣳहसाऐही। प्रतिष्ठासिप्रति। ष्ठा। (द्वे त्रिः)। वर्चोसिमनोसिऐहीऽ३। हाउवा॥ ए। भूतम्। (द्वे त्रिः)॥

(दी. ४७। प. २५। मा. ९) २१ (ञो।२२७)

(१३९।१) ॥ ऋष्यस्यसाम व्रतम्। कश्यपोऽनुष्टुबिन्द्रः॥

हरीतइन्द्रश्मश्रूणी॥ उतोतेहरिताऽ१उहाऽ३री॥ तन्त्वास्तुवन्तिकाऽ३। वायाः॥ पुरुषासोवनाऽ३। गावाः॥

ऋश्यासइन्द्रभुङ्क्तिमघवन्निन्द्रभुङ्क्तिभुङ्क्तिप्रभुङ्क्तीन्द्रस्तसरपूताऽ२३४५ः॥

(दी. ९। प. ७। मा. ६) २२ (थू।२२८)

॥ दश षष्ठः खण्डः॥६॥

॥ इति (ग्रामे) आरण्यकगाने पञ्चमस्यार्द्धः प्रपाठकः॥

(१४०।१)॥ दिशां व्रतम् दशानुगानम्। दिशोऽनुष्टुप् आत्मा। (कश्यपगायत्रीन्द्रः)॥

हाउ(३)। अहमन्नम्। (त्रिः)। अहमन्नादो। हमन्नादो। हमन्नादो। हंविधारयो। (द्विः)।

हंविधारयः। हाउ(३)। यद्वर्चोहिरण्य। स्या॥ यद्वावर्चोगवासु। ता॥ सत्यस्यब्रह्मणोव। चाः॥

तेनमास॰सृजाम्। साइ। हाउ(३)। अहमन्नम्। (त्रिः)। अहमन्नादो। हमन्नादो। (द्विः)।

हंविधारयो। (द्विः)। हंविधारयः। हाउ(३)। वा॥ ए। अहमन्नमहमन्नादोहंविधारयः। (द्वे त्रिः)।

ए। अह॰सुवर्ज्योतीऽ२३४५ः॥

(दी. ५३। प. ३९। मा. २६) १ (ढू।२२९)

(१४०।२)

हाउ(३)। अह॰सहो। ह॰सहो। (द्विः)। ह॰सासहिः। अह॰सासहिः। (द्विः)।

अह॰सासहानो। ह॰सासहानो। ह॰सासहानः। हाउ(३)। यद्वर्चोहिरण्य। स्या॥

यद्वावर्चोगवासु। ता॥ सत्यस्यब्रह्मणोव। चाः॥ तेनमास॰सृजाम। साइ। हाउ(३)।

अह॰सहो। ह॰सहो। (द्विः)। ह॰सासहिः। अह॰सासहिः। (द्विः)। अह॰सासहानो।

ह॰सासहानो। ह॰सासहानः। हाउहाउहाउ। वा॥ ए। अह॰सहोह॰सासहिरह॰सासहानः।

(द्वे त्रिः)। ए। अह॰सुवर्ज्योतीऽ२३४५ः॥

(दी. ६२। प. ३९। मा. २६) २ (झू।२३०)

(१४०।३)

हाउ(३)। अहंवर्चो। हंवर्चो। हंवर्चः। हाउ(३)। यद्वर्चोहिरण्य। स्या॥ यद्वावर्चोगवामु। ता॥
सत्यस्यब्रह्मणोव। चाः॥ तेनमासꣳसृजाम। साइ। हाउ(३)। अहंवर्चो। हंवर्चो। हंवर्चः।
हाउ(३)। वा॥ ए। अहंवर्चः। (द्वे त्रिः)। ए। अहꣳसुवर्ज्योतीऽ२३४५ः॥

(दी. २६। प. २७। मा. २०) ३ (खौ।२३१)

(१४०।४)

हाउ(३)। अहंतेजो। हंतेजो। हंतेजः। हाउ(३)। यद्वर्चोहिरण्य। स्या॥ यद्वावर्चोगवामु। ता॥
सत्यस्यब्रह्मणोव। चाः॥ तेनमासꣳसृजाम। साइ। हाउ(३)। अहंतेजो। हंतेजो। हंतेजः।
हाउहाउहाउ। वा॥ ए। अहंतेजः। (द्वे त्रिः)। ए। अहꣳसुवर्ज्योती२३४५ः॥

(दी. ३५। प. २७। मा. २०) ४ (फा।२३२)

(१४०।५)

हाउ(३)। दिशन्दुहे। (त्रिः)। दिशौदुहे। (त्रिः) दिशोदुहे। (त्रिः)। सर्वादुहे। (त्रिः)। हाउ(३)।
यद्वर्चोहिरण्य। स्या॥ यद्वावर्चोगवामु। ता॥ सत्यस्यब्रह्मणोव। चाः॥ तेनमासꣳसृजाम।
साइ। हाउ(३)। दिशन्दुहे। (त्रिः)। दिशौदुहे। (त्रिः)। दिशोदुहे। (त्रिः)। सर्वादुहे। (त्रिः)।
हाउ(३)। वा॥ ए। दिशन्दुहेदिशौदुहेदिशोदुहेसर्वादुहे। (द्वे त्रिः)। ए।
अहꣳसुवर्ज्योतीऽ२३४५ः॥

(दी. ८५। प. ४५। मा. १५) ५ (मु।२३३)

(१४०।६)

हाउ(३)। मनोजयित्। (त्रिः)। हृदयमजयित्। (त्रिः)। इन्द्रोजयित्। (त्रिः)। अहमजैषम्।
(त्रिः)। हाउ(३)। यद्वर्चोहिरण्य। स्या॥ यद्वावर्चोगवामु। ता॥ सत्यस्यब्रह्मणोव। चाः॥
तेनमास॰सृजाम। साइ। हाउ(३)। मनोजयित्। (त्रिः)। हृदयमजयित्। (त्रिः)। इन्द्रोजयित्।
(त्रिः)। अहमजैषम्। (त्रिः)। हाउ(३)। वा॥ ए। मनोजयिद्धृदयमजयिदिन्द्रोजयिदहमजैषम्।
(द्वे त्रिः)। ए। अह॰सुवर्ज्योतीऽ२३४५ः॥

(दी. ४९। प. ४५। मा. ४२) ६ (ना।२३४)

(१४०।७)

हाउ(३)। वयः। (त्रिः)। वयोवयः। (त्रिः)। हाउ(३)। यद्वर्चोहिरण्य। स्या॥ यद्वावर्चोगवामु।
ता॥ सत्यस्यब्रह्मणोव। चाः॥ तेनमास॰सृजाम। साइ। हाउ(३)। वयः। (त्रिः)। वयोवयः।
(त्रिः)। हाउ(३)वा॥ ए। वयोवयोवयः। (द्वे त्रिः)। ए। अह॰सुवर्ज्योतीऽ२३४५ः॥

(दी. ३४। प. ३३। मा. ३०) ७ (दौ।२३५)

(१४०।८)

हाउ(३)। रूपम्। (त्रिः)। रूप॰रूपम्। (त्रिः)। हाउ(३)। यद्वर्चोहिरण्य। स्या॥
यद्वावर्चोगवामु। ता॥ सत्यस्यब्रह्मणोव। चाः॥ तेनमास॰सृजाम। साइ। हाउ(३)। रूपम्।
(त्रिः)। रूप॰रूपम्। (त्रिः)। हाउहाउहाउ। वा॥ ए। रूप॰रूप॰रूपम्। (द्वे त्रिः)। ए।
अह॰सुवर्ज्योतीऽ२३४५ः॥

(दी. ४९। प. ३३। मा. ३०) ८ (दा।२३६)

(१४०।९)

हिहियऊऽ२। (त्रिः)। उदपप्तम्। (त्रिः)। ऊर्ध्वानभाꣳस्यकृषि। (त्रिः)। व्यद्यौत्सम। (त्रिः)।
अततनम्। (त्रिः)। हाउ(३)। यद्वर्चोहिरण्य। स्या॥ यद्वावर्चोगवामु। ता॥ सत्यस्यब्रह्मणोव।
चाः॥ तेनमासꣳसृजाम। साइ। हिहियऊऽ२। (त्रिः)। उदपप्तम्। (त्रिः)। ऊर्ध्वानभाꣳस्यकृषि।
(त्रिः)। व्यद्यौत्सम्। (त्रिः)। अततनम्। (त्रिः)। हाउ(३)। वा। ए।
उदपप्तमूर्ध्वानभाꣳस्यकृषिव्यद्यौत्समततनम्। (द्वे त्रिः)। एऽ३। पिन्वस्वाऽ२३४५॥

(दी. ५०। प. ४१। मा. ३५) १ (भु।२३७)

(१४०।१०)

हाउ(३)। प्रथे। (त्रिः)। प्रत्युष्ठाम्। (त्रिः)। हाउ(३)। यद्वर्चोहिरण्य। स्या॥ यद्वावर्चोगवामु।
ता॥ सत्यस्यब्रह्मणोव। चाः॥ तेनमासꣳसृजाम। साइ। हाउ(३)। प्रथे। (त्रिः)। प्रत्यष्ठाम्।
(त्रिः)। हाउहाउहाउ। वा॥ ए। प्रथेप्रत्यष्ठाम्। (द्वे त्रिः)। ए। अहꣳसुवर्ज्योतीऽ२३४५ः॥

(दी. ४०। प. ३३। मा. २४) १० (बी।२३८)

॥ दश सप्तमः खण्डः॥७॥

(१४१।१) ॥ कश्यपव्रतं दशानुगानम्। कश्यपो गायत्रीन्द्रः॥

हाउ(३)। हाऽ२इ। ऊऽ२। (द्वे त्रिः)। काह्वह्वह्वह्वह्व। (त्रिः)। हाऽ२इ। ऊऽ२। ऊऽ२।
ऊऽ२। (चत्वारि त्रिः)। काह्वह्वह्वह्वह्व। ऊऽ२। (द्वे त्रिः)। हाउ(३)। यस्येदमारजोयूऽ२जाः॥
तुजेजनेवनꣳसूऽ२वाः॥ हाउ(३)। हाऽ२इ। ऊऽ२। (द्वे त्रिः)। काह्वह्वह्वह्वह्व। (त्रिः)। हाऽ२इ।
ऊऽ२। ऊऽ२। ऊऽ२। (चत्वारि त्रिः)। काह्वह्वह्वह्वह्व। ऊऽ२। (द्वे त्रिः)। हाउ(३)। हाउ(३)।
आइन्द्रस्यर॥ तियाऽ३म्बृऽ५हाऽ६५६त्॥ नमःसुवरिडाऽ२३४५त्॥

(दी. १४। प. ६३। मा. २८) ११ (जै।२३९)

(१) ॥ काश्यपग्रीवा (द्वितीयं)। कश्यपोऽनुष्टुबिन्द्रः॥

हाउ(३)॥ अहोऽऽअहोऽऽ। अहो। आहोऽआहोऽ। आहो॥ एऽहोएऽहो॥ एहो। वाऽ३।

हाउवाऽ३॥ प्रजाभूतमजीजनेऽ३। इट्स्थिइडाऽ२३४५॥

(दी. ६। प. ११। मा. ८) ११ (कै।२४०)

(१४२।१) ॥ कश्यपव्रतं दशानुगानम् (तृतीयं)। कश्यपस्त्रिष्टुबिन्द्रः॥

हाउ(३)। फाल्फल्फल्फल्फल्फल्। (त्रिः)। हाउ(३)। इन्द्रन्नरोनेमधिताहवाऽ२न्ताइ॥

यत्पार्यायुनजतेधियाऽ२स्ताः॥ शूरोनृषाताश्रवसश्चकाऽ२माइ॥ आगोमतिव्रजेभजातुवाऽ२न्नाः।

हाउ(२)। फाल्फल्फल्फल्फल्फल्। (त्रिः)। हाउ(३)। वा॥ मनःसुवरिडाऽ२३४५॥

(दी. २३। प. १६। मा. ५२) १३ (टा।२४१)

(१४३।१) ॥ कश्यपव्रतं दशानुगानम् (चतुर्थं)। कश्यपस्त्रिष्टुबिन्द्रः॥

हाउ(३)। हाउहौहौहौहौहौ। (त्रिः)। हाउ(३)। योनोवनुष्यन्नभिदातिमाऽ२र्ताः॥

उगणावामन्यमानस्तुरोऽ२वा॥ क्षिधीयुधाशवसावातमाऽ२इन्द्रा॥ अभीष्यामवृषमणस्त्वोऽ२ताः।

हाउ(३)। हाउहौहौहौहौहौ। (त्रिः)। हाउहाउहाउ। वा॥ एवयःसुवरिडाऽ२३४५॥

(दी. ५२। प. १६। मा. २१) १४ (चा।२४२)

(१) ॥ (प्रजापतेर्हृदयं) कश्यपव्रतं दशानुगानम् (पञ्चमं)। कश्यपोऽनुष्टुप्प्रजापतिः॥

हाउ(३)। इमाः। (त्रिः)। प्रजाः। (त्रिः)। प्रजापते। होइ। (द्वे द्विः)॥ प्रजापते। हाऽ३१उ।
वाऽ२॥ ए। हृदयम्। (द्वे द्विः)। ए। हृदयाऽ३१उ। वाऽ२॥ प्रजारूपमजीजनेऽ३।
इट्स्थिइडाऽ२३४५॥

(दी. २१। प. २३। मा. १६) १५ (गू।२४३)

(१) ॥ कश्यपव्रतं दशानुगानम् (इडानाम् संक्षरः षष्ठः)। कश्यपोऽनुष्टुप्प्रजापतिः॥

हाउ(३)॥ इडा। (त्रिः)। सुवः॥ (त्रिः)। ज्योतिः॥ (द्विः)। ज्योताऽ३४। औहोवा॥ ए।
इडासुवर्ज्योतीऽ२३४५ः॥

(दी. १४। प. १३। मा. ९) १६ (दो।२४४)

(१४४।१) ॥ कश्यपव्रतं दशानुगानम् (प्रथमम्)। कश्यपस्त्रिष्टुबिन्द्रः॥

हाउ(३)। आइही। (त्रिः)। ओहा। ओहा। ओहाऽ३। हाउ(३)। सहस्तन्नइन्द्रदध्योऽ२जाः।
आयाऽ२उ। ऊ। आयाउ॥ (त्रीणी त्रिः)। ईशेह्यस्यमहतोविराऽ२ष्णाइन्। आयाऽ२उ। ऊ।
आयाउ॥ (त्रीणी त्रिः)। क्रतुन्ननृम्णꣳस्थविरंचवाऽ२जाम्। आयाऽ२उ। ऊ। आयाउ॥ (त्रीणी
त्रिः)। वृत्रेषुशत्रून्सहनाकृधाऽ२इनाः। आयाऽ२उ। ऊ। आयाउ॥ (त्रीणी त्रिः)। हाउ(३)।
आइही। (त्रिः)। ओहा। ओहा। ओहाऽ३। हाउहाउहाउ। वा॥ ए।
आयुर्द्धाअस्मभ्यंवर्चोधादेवेभ्याऽ२३४५ः॥

(दी. ४६। प. ५९। मा. ५१) १७ (घ।२४५)

(१४५।१) ॥ गवां व्रते द्वे, (प्रथममिदं) कश्यपस्त्रिष्टुबिन्द्रः॥

हाउ(३)। तेमन्वतप्रथमन्नामगो। नाम्। नाम्। नाम्॥ हाउ(३)। त्रिस्सप्तपरमन्नामजा। नान्।
नान्। नान्॥ हाउ(३)। ताजानतीरभ्यनूषता। क्षाः। (त्रिः)॥ हाउ(३)।
आविर्भुवन्नरुणीर्यशसागा। वाः। (त्रिः)। हाउ(३)। वा॥ ए। दुघाः। (द्वे द्विः)। ए।
दुघाऽ२३४५ः॥

(दी. २७। प. २८। मा. ३०) १८ (जौ।२४६)

(१४६।१) ॥ सभासत्साम। गावस्त्रिष्टुब्गावः॥

हाउ(३)वा। सहर्षभास्सहवत्साउदेत॥ हाउ(३)वा। विश्वारूपाणिबिभ्रतीर्द्व्यूघ्नीः॥ हाउ(३)वा।
उरुःपृथुरयंवोअस्तुलोकः॥ हाउ(३)वा। इमाआपःसुप्रपाणाइहस्त। हाउ(३)वा॥
अश्वमिष्टायेऽ३हस्॥

(दी. १५। प. १०। मा. २२) १९ (मा।२४७)

(१४७।१) ॥ कश्यप पुच्छं दशमम्। कश्यपस्त्रिष्टुबिन्द्रः अग्निर्वा॥

हाउ(३)। वाग्घहहहह। (त्रिः)। ऐहीऽ२। (त्रिः)। ऐहीहाउवाक्। (त्रिः)। हाहाउ। (त्रिः)।
हाउ(३)वा। प्रजातोकमजीजनेहस्। इहाऽ२३४५। हाउ(३)। वाग्घहहहह। (त्रिः)। ऐहीऽ२।
(त्रिः)। ऐहिहाउवाक्। (त्रिः)। हाहाउ। (त्रिः)। आयाउ। (त्रिः)। अग्निरस्मिजन्मनाऔऽ३हो।
हाऽ२इया। औऽ३हो। हाऽ२इया। औऽ३होऽ३॥ हाउ(३)। वाग्घहहहह। (त्रिः)। ऐहीऽ२।
(त्रिः)। ऐहिहाउवाक्। (त्रिः)। हाहाउ। (त्रिः)। हाउ(३)वा। इहप्रजामिहरियꣳरराणोहस्।
इहाऽ२३४५। हाउ(३)। वाग्घहहहह। (त्रिः)। ऐहीऽ२। (त्रिः)। ऐहिहाउवाक्। (त्रिः)। हाहाउ
। (त्रिः)। आयाउ। जातवेदाऔऽ३हो। हाऽ२इया। औऽ३हो। हाऽ२इया। औऽ३होऽ३।

हाउ(३) वाग्घहहहह। (त्रिः)। ऐहीऽ२। (त्रिः)। ऐहिहाउवाक्। (त्रिः)। हाहाउ । (त्रिः)।

हाउ(३)वा। रायस्पोषायसुकृतायभूयसेहस्। इहाऽ२३४५। हाउ(३)। वाग्घहहहह। (त्रिः)।

ऐहीऽ२। (त्रिः)। ऐहिहाउवाक्। (त्रिः)। हाहाउ । (त्रिः)। आयाउ। (त्रिः)।

घृतंचक्षुरमृतंमआसानौऽ३हो। हाऽ२इया। औऽ३हो। हाऽ२इया। औऽ३होऽ३। हाउ(३)।

वाग्घहहहह। (त्रिः)। ऐहीऽ२। (त्रिः)। ऐहिहाउवाक्। (त्रिः)। हाहाउ। (त्रिः)। हाउ(३)वा।

आगन्वाममिदंबृहद्धस्। इहाऽ२३४५। हाउ(३)। वाग्घहहहह। (त्रिः)। ऐहीऽ२। (त्रिः)।

ऐहिहाउवाक्। (त्रिः)। हाहाउ। (त्रिः)। आयाउ। (त्रिः)। त्रिधातुरर्कोरजसोविमानाऔऽ३हो।

हाऽ२इया। औऽ३हो। हाऽ२इया। औऽ३होऽ३॥ हाउ(३)। वाग्घहहहह। (त्रिः)। ऐहीऽ२।

(त्रिः)। ऐहिहाउवाक्। (त्रिः)। हाहाउ। (त्रिः)। हाउ(३)वा। इदंवाममिदंबृहद्धस्।

इहाऽ२३४५। हाउ(३)। वाग्घहहहह। (त्रिः)। ऐहीऽ२। (त्रिः)। ऐहिहाउवाक्। (त्रिः)। हाहाउ

। (त्रिः)। आयाउ। (त्रिः)। अजस्रंज्योताइरौऽ३हो। हाऽ२इया। औऽ३हो। हाऽ२इया।

औऽ३होऽ३॥ हाउ(३)। वाग्घहहहह। (त्रिः)। ऐहीऽ२। (त्रिः)। ऐहिहाउवाक्। (त्रिः)।

हाहाउ। (त्रिः)। हाउ(३)वा। चराचरायबृहतइदंवाममिदंबृहद्धस्। इहाऽ२३४५। हाउ(३)।

वाग्घहहहह। (त्रिः)। ऐहीऽ२। (त्रिः)। ऐहिहाउवाक्। (त्रिः)। हाहाउ । (त्रिः)। आयाउ।

(त्रिः)। हविरस्मिसर्वामौऽ३हो। हाऽ२इया। औऽ३हो। हाऽ२इया। औऽ३होऽ३। हाउ(३)।

वाग्घहहहह। (त्रिः)। ऐहीऽ२। (त्रिः)। ऐहिहाउवाक्। (त्रिः)। हाहाउ । (त्रिः)। हाउ(३)वा।

एयश्लोकान्भूतमततनत्प्रजाउसमचूकुपत्पशुभ्योहस्। इहाऽ२३४५॥

(दी. ११९। प. २३८। मा. २२१) २० (ग।२४८)

(१)॥ आनुडुद्वते द्वे, निह्नवामि निह्नवौ द्वावनडुद्वते वा निह्नवम्। प्रजापतिरनुष्टुबिन्द्रः॥

इतीऽ२इति। (त्रिः)। इतिमात्राचरतिवत्सकाऽ२इति। (द्विः)॥ इतिमात्राचरतिवत्सकाऽ२३ः॥

आऽ२इ। ताऽ२३४। औहोवा॥ ए। इति। ए। इति। ए। इतीऽ२३४५॥

(दी. ११। प. १५। मा. ७) २१ (ङे।२४९)

(२) ॥ अभिनिह्नव्रतेमतदनडुद्वतं वा॥

स्वयꣳस्कुन्वाइ। स्वयꣳस्कून्वाऽ२इ। (द्वे द्विः)। स्वयꣳस्कुन्वाइ। स्वयम्। स्कूऽ२। न्वाऽ२३४।

औहोवा॥ ए। स्कुन्वे। (द्वे द्विः)। ए। स्कुन्वाऽ२३४५इ॥

(दी. ७। प. १५। मा. ७) २२ (ञे।२५०)

[वाचोव्रतपर्वणि ८४ सामानि]

॥ द्वादशाष्टमः खण्डः॥८॥

॥ इति (ग्रामे) आरण्यकगाने पञ्चमः प्रपाठकः॥५॥

॥ इति वाचोव्रत-नाम तृतीयं पर्व समाप्तम्॥

॥ इति पञ्चमं गानं समाप्तम्॥

॥ अथ शुक्रिय पर्व॥

(१४८।१) ॥ अग्नेर्व्रतम्। अग्निर्गायत्री॥

हाउहाउहाउ। भ्राजाओवा। (त्रिः)। अग्निर्मूर्द्धादिऽ३वाःकाऽ१कूऽ२त्॥

पतिःपृथीवीऽ३याआऽ१याऽ२म्॥ अपाꣳरेताꣳसिऽ३जाइन्वाऽ१तीऽ२३॥ हाउ(३)।

भ्राजाओवा। (द्विः)। भ्राजाऽ३ओऽ५वाऽ६५६॥ ए। विश्वस्यजगतोज्योतीऽ२३४५ः॥

(दी. ३६। प. १३। मा. १७) १ (गे।२५१)

(१४९।१) ॥ वायोर्व्रतम्। वायुरत्यष्टिःसोमः॥

भ्राजा। (द्विः)। भ्राजाऽ३१उ। वाऽ२। अयारुचाहरिण्यापुनानः। विश्वाद्वेषाꣳसित्तरतिसयुग्वभिः।

सूरोनसयुवग्भिः। धारापृष्ठस्यरोचत। पुनानोअरुषोहरिः॥ विश्वायद्रूपापरियास्यृक्वभिः॥

सप्तास्येभिर्ऋक्वभिः। भ्राजा। (द्विः)। भ्राजाऽ३१उ। वाऽ२॥ ए। विश्वस्मैजगतेज्योतिः।

ज्योऽ२ताऽ२३४औहोवा॥ इट्स्थि-इडाऽ२३४५॥

(दी. ३४। प. १९। मा. १२) २ (धा।२५२)

(१५०।१) ॥ महावैश्वानर व्रते द्वे। वैश्वानरो जगती वैश्वानरः॥

हाउ(२)। ओहा। (द्विः)। ओहाइ। वयोहोइ। (त्रिः)। पयोहोइ। (त्रिः)। चक्षुर्होइ। (त्रिः)।

श्रोत्रꣳहोइ। (त्रिः)। आयुर्होइ। (त्रिः)। तपोहोइ। (त्रिः)। वर्चोहोइ। (त्रिः)। तेजोहोइ। (त्रिः)।

सुवर्होइ। (त्रिः)। ज्योतिर्होइ। (त्रिः)। प्रक्षस्यवृष्णोअरुषस्यनूमाऽ२३हाः॥

प्रनोवचोविदथाजातवेदाऽ२३साइ॥ वैश्वानरायमतिर्नव्यसेशूऽ२३चीः॥

सोमइवपवतेचारुरग्नाऽ२३याऽ३इ। हाउ(३)। ओहा (द्विः)। ओहाइ। वयोहोइ। (त्रिः)।

पयोहोइ। (त्रिः)। चक्षुर्होइ। (त्रिः)। श्रोत्र२होइ। (त्रिः)। आयुर्होइ। (त्रिः)। तपोहोइ। (त्रिः)।

वर्चोहोइ। (त्रिः)। तेजोहोइ। (त्रिः)। सुवर्होइ। (त्रिः)। ज्योतिर्होइ। (द्विः)। ज्योतिर्होऽ२।

वाऽ२३४औहोवा॥ ए। अग्निःसमुद्रमाक्षयत्। ए। अग्निर्मूर्द्धाभवद्दिवः। ए।

आयुर्द्धाअस्मभ्यंवर्चोधादेवेभ्याऽ२३४५ः॥

(दी. १००। प. ७९। मा. ७८) ३ (भै।२५३)

(१५१।१) ॥ वैश्वानरो बृहती वैश्वानरः॥

ओऽ३१म्। (त्रिः)। आयुः। (त्रिः)। ज्योतीः। (त्रिः)। ज्योतोवा। (त्रिः)। ज्योतोवाहाइ। (द्विः)।

ज्योतोवाऽ३हाउ। वा। इहस्वर्वैश्वानरायप्रदिशोज्योतिर्बृहत्। इन्दुरिडासत्यम्। सत्यम्।

सत्योवा। (त्रिः)। सत्योवाहाइ। (द्विः)। सत्योवाऽ३हाउ। वा।

इहस्वर्वैश्वानरायप्रदिशोज्योतिर्बृहत्। कायमानोवनातुवाम्। तुवाम्। तुवाम्। तुवोना। (त्रिः)।

तुवोवाहाइ। (द्विः)। तुवोवाऽ३हाउ। वा। इहस्वर्वैश्वानरायप्रदिशोज्योतिर्बृहत्॥ द्यौर्भूतंपृथिवी।

पृथिवी। (द्विः)। पृथिव्योवा। (त्रिः)। पृथिव्योवाहाइ। (द्विः)। पृथिव्योवाऽ३हाउ। वा।

इहस्वर्वैश्वानरायप्रदिशोज्योतिर्बृहत्। यन्मातृजगन्नपाः। अपाः। अपाः। अपोवा। (त्रिः)।

अपोवाहाइ। (द्विः)। अपोवाऽ३हाउ। वा। इहस्वर्वैश्वानरायप्रदिशोज्योतिर्बृहत्॥

सहस्तेजआपः। आपः। आपः। आपोवा। (त्रिः)। आपोवाहाइ। (द्विः)। आपोवाऽ३हाउ। वा।

इहस्वर्वैश्वानरायप्रदिशोज्योतिर्बृहत्। नतत्तेअग्नेप्रमृषेनिवर्तनाम्। तनाम्। तनाम्। तनोवा।

(त्रिः)। तनोवाहाइ। (द्विः)। तनोवाऽ३हाउ। वा। इहस्वर्वैश्वानरायप्रदिशोज्योतिर्बृहत्॥

उषादिशोज्योतिः। ज्योतिः। ज्योतिः। ज्योतोवा। (त्रिः)। ज्योतोवाहाइ। (द्विः)।

ज्योतोवाऽ३हाउ। वा। इहस्स्वर्वैश्वानरायप्रदिशोज्योतिर्बृहत्। यद्दूरेसन्निहाभुवाः। भुवाः। भुवाः।

भुवोवा। (त्रिः)। भुवोवाहाइ। (द्विः)। भुवोवाऽ३हाउ। वा।

इहस्स्वर्वैश्वानरायप्रदिशोज्योतिर्बृहत्। ओऽ३१म्। (त्रिः)। आयूः। (त्रिः)। ज्योतीः। (त्रिः)।

ज्योतोवा। (त्रिः)। ज्योतोवाहाइ। (द्विः)। ज्योतोवाऽ३हाउ। वा॥ घर्मोमरुद्भिर्भुवनेषुचक्रदत्।

इट्ऽस्थिइडाऽ२३४५॥

(दी. २२०। प. १२३। मा. ८२) ४ (बा।२५४)

(१५२।१) ॥ सूर्यस्य भ्राजा भ्राजे द्वे, भ्राजम्। द्वयोः सूर्यो गायत्र्यग्निः॥

भ्राजा। (द्विः)। भ्राजाऽ३१उ। वाऽ२। अग्नआयूꣳषिपवसे॥ आसुवोर्जमिषंचनः॥

आरेबाधस्वदुच्छुनाम्। भ्राजा। (द्विः)। भ्राजाऽ३१उ। वाऽ२॥ ए। भ्राज। (द्वे त्रिः)॥

(दी. २१। प. १७। मा. ५) ५ (खु।२५५)

(१५३।१) ॥ आभ्राजम्॥

आ। भ्राज। (द्वे त्रिः)। अग्निर्मूर्द्धादिऽ३वाःकाऽ१कूऽ२त्॥ पतिःपृथीविऽ३याआऽ१याऽ२म्॥

अपाꣳरेताꣳसिऽ३जाइन्वाऽ१तीऽ२॥ आ। भ्राज। (द्वे द्विः)। आ। भ्राजाऽ३उवा॥ ए।

आभ्राज। (द्वे त्रिः)॥

(दी. २१। प. २१। मा. ५) ६ (कु।२५६)

(१५४।१) ॥ वायोर्विकर्णभासे द्वे, मृत्योर्वा। विकर्णं वायुर्जगती सूर्यः॥

हाहाउ। (त्रिः)। इडा। (त्रिः)। हस्। (त्रिः)। ऋतम्मे। (त्रिः)।

विभ्राड्बृहत्पिबतुसोमियाऽ२म्माधूऽ२। आयुर्द्दधद्यज्ञपतावव्वाऽ२इह्रूताऽ२म्॥

वातजूतोयोअभिरक्षताऽ२इत्मानाऽ२॥ प्रजाःपिपर्तिबहुधाविराऽ२जातीऽ२। हाहाउ। (त्रिः)।

इडा। (त्रिः)। हस्। (त्रिः)। ऋतम्मे। (त्रिः)। औहोवाहाउ। वा॥ फाऽ२ट्। ऋतम्मे। (त्रिः)।

औहोवाहाउ। वा। फाऽ२ट्। ऋतम्मे। (त्रिः)। औहोवाहाउ। वा। भ्राऽ२ट्॥

(दी. ३४। प. ४३। मा. २२) ७ (दा।२५७)

(१५५।१) ॥ भासम्। वायुः जगती वैश्वानरः॥

हाउहाउहाउ। ओहा। (द्विः)। ओहाइ। इहौहो। (त्रिः)। इहियो। (त्रिः)। हिम्। (त्रिः)। हो।

(त्रिः)। ह्श्। (त्रिः)। इडा (त्रिः)। ऋतम्मे। (त्रिः)। हस्। (त्रिः)।

प्रक्षस्यवृष्णोअरुषस्यनूमाऽ२३हाः॥ प्रनोवचोविदथाजातवेदाऽ२३साइ॥

वैश्वानरस्यमतिर्नव्यसेशूऽ२३चीः॥ सोमइवपवतेचारुरग्नाऽ२३याऽ३इ। हाउ(३)। ओहा।

(द्विः)। ओहाइ। इहौहो। (त्रिः)। इहियो। (त्रिः)। हिम्। (त्रिः)। हो। (त्रिः)। ह्श्। (त्रिः)।

इडा। (त्रिः)। ऋतम्मे। (त्रिः)। हस्। (द्विः)। हाऽ२३४। औहोवा॥ इहौहो। भद्रम्। इहौहो।

श्रेयः। इहौहो। वामम्। इहौहो। वरम्। इहौवो। सुवम्। इहौहो। अस्ति। इहौहो।

अभ्राजीत्। इहौहो। ज्योतिः। अभ्राजीत्। इहौहो। दीदिवः। एऽ२३। हियाहाउवाऽ३॥

भाऽ२३४५म्।

(दी. ७९। प. ८३। मा. ३६) ८ (दू।२५८)

॥ ऐन्द्रं महादिवकीर्त्यं सौर्यं वा दशानुगानं। तस्य शिरश्च ग्रीवश्च स्कन्धकीकसौ च पुरीषाणि च पक्षौ चात्मा चोरू च पुच्छं चैतत्, साम॥ सुपर्णमित्याचक्षते, शिरोनाम प्रथमानुगानम्।

आत्मसामनि ऋष्यादयो नान्यत्र इन्द्रो जगतीसूर्य आत्मा॥

(१)

हाउ(३)। आयुः। (त्रिः)। ज्योतिः। (द्विः)। ज्योताऽ३४। औहोवा॥ एऽ३। वाङ्ज्योतीऽ२३४५ः॥

(दी. १३। प. १०। मा. ९) ९ (णो।२५९)

(२) ॥ ऐन्द्रं महादिवाकीर्त्यं सौर्यं वा। ग्रीवानाम द्वितीयानुगानम्॥

एवाहियेवाऽ२३४औहोवा। हंस्थिहंहंस्थिहंहंऽ३४। औहोवा। (त्रीणि त्रिः)॥ हियेवा।
हियग्नाइ। हिइन्द्रा। हिपूषान्। हिदेवाऽ२३४५ः॥

(दी. ३०। प. १४। मा. १३) १० (भि।२६०)

(३) ॥ ऐन्द्रं महादिवाकीर्त्यं सौर्तं वा। स्कन्धोनाम तृतीयानुगानम्॥

वयोमनोवयःप्राणाः। वयश्चक्षुर्वयःश्रोत्राम्। वयोघोषोवयोव्राताम्। वयोऽ२३भूताउ। वाऽ३॥
ईऽ२३४५॥

(दी. ७। प. ६। मा. ४) ११ (च्री।२६१)

(४) ॥ ऐन्द्रं महादिवाकीर्त्यं सौर्यं वा। कीकसोनाम चतुर्थानुगानम्॥

वयोमनाऽ२३ः। होइहौवाओऽ२३४वा। वयःप्राणाऽ२३ः। होइहौवाओऽ२३४वा।
वयश्चक्षूऽ२३ः। होइहौवाओऽ२३४वा। वयःश्रोत्राऽ२३म्। होइहौवाओऽ२३४वा।
वयोघोषाऽ२३ः। होइहौवाओऽ२३४वा। वयोव्रताऽ२३म्। होइहौवाओऽ२३४वा।
वयोभूताऽ२३म्। होइहौवाओऽ२३४वाऽ६५६॥ ऊऽ२३४५॥

(दी. ८। प. १५। मा. २१) १२ (र्ण।२६२)

(५) ॥ ऐन्द्रं महादिवाकीर्त्यं सौर्यं वा। पक्षोनाम पञ्चानुगानम्॥

ऊऽ२र्क। हाउ(३)। होऽ३वाक्। (त्रीणि त्रिः)। धर्मोऽ२धर्मः। (त्रिः)॥

(दी. १२। प. १२। मा. १८) १३ (छै।२६३)

(६) ॥ तवश्यावीयम्, ऐन्द्रं महादिवाकीर्त्यं सौर्यं वा। पक्षोनाम षष्ठोनुगानमपि॥

धर्मविधर्म। (त्रिः)। सत्यंगाय। (त्रिः)। ऋतंवद। (त्रिः)। हꣳवंवऽ२०वंवऽ२०वम्॥ (त्रिः)॥

(दी. ३। प. १२। मा. ३) १४ (ठि।२६४)

(१५६।७) ॥ ऐन्द्रं महादिवाकीर्त्यं सौर्यं वा। आत्मा नाम सप्तमानुगानम्॥

औहौहोवाहाइ। (द्विः)। औहौहोवाहाऽ३१उ। वाऽ२३। भूऽ२३४वात्।
विभ्राड्बृहत्पिबतुसोम्यंम। ध्वौहौहोवाहोइ। औहौहोवाहोइ। औहौहोवाहाऽ३१उ। वाऽ२३।
जाऽ२३४नात्। आयुर्दधद्यज्ञपतावविह्रुतम्॥ औहौहोवाहोइ। (द्विः)। औहौहोवाहाऽ३१उ।
वाऽ२३। वाऽ२३४र्द्धात्। वातजूतोयोअभिरक्षतित्मना॥ औहौहोवाहाइ। (द्विः)।
औहौहोवाहाऽ३१उ। वाऽ२३। काऽ२३४रात्। प्रजाःपिपर्तिबहुधाविराजति। औहौहोवाहाइ।
(द्विः)। औहौहोवाहाऽ३१उ। वाऽ२॥ ए। अभ्राजीज्योतिरभ्राजीऽ२३४५त्॥

(दी. ७७। प. ३०। मा. २२) १५ (त्ना।२६५)

(८) ॥ ऐन्द्रं महादिवाकीर्त्यं सौर्यं वा। ऊरुर्नामाष्टमानुगानम्॥

भूमिः। (त्रिः)। अन्तरिक्षम्। (त्रिः)। द्यौः। (द्विः)। द्याऽ३४। औहोवा॥ एऽ३।
भूतायाऽ२३४५॥

(दी. ७। प. १२। मा. ८) १६ (छै।२६६)

(९) ॥ ऐन्द्रं महादिवाकीर्त्यं सौर्यं वा। ऊरुनाम नवमानुगानमपि॥

द्यौः। (त्रिः)। अन्तरिक्षम्। (त्रिः)। भूमिः। (द्विः)। भूमाऽ३४। औहोवा॥ एऽ३।
आयुषेऽ२३४५॥

(दी. ६। प. १२। मा. ८) १७ (खै।२६७)

(१०) ॥ ऐन्द्रं महादिवाकीर्त्यं सौर्यं वा। पुच्छंनाम दशानुगानम्॥

हाउ(३)। ज्योतिः। (द्विः)। ज्योताऽ३४। औहोवा॥ ईऽ२३४५॥

(दी. ८। प. ६। मा. ५) १८ (ट्रु।२६८)

(१) ॥ अकविंशत्यनुगाने आदित्यव्रतम्। एतत्साम सुपर्णमित्याचक्षते॥

सन्वाभूतान्यैरयन्। होइ॥ सन्वाभव्यान्यैरयन्। होइ॥ सन्वाभविष्यदैरयत्। होइ॥
सन्वाभुवनमैरयत्। होइ॥ सन्वाभूतामैरयत्। होइ॥

(दी. १४। प. १०। मा. १०) १९ (नौ।२६९)

॥ इति ग्रामे आरण्यकगाने षष्ठस्यार्द्धः प्रपाठकः॥

(१५७-१५९।१) ॥ आदित्यव्रतम्॥

उवीऽ२उवि। उविहोऽ२उवि। (द्वे त्रिः)। इतीऽ२इति। इतिहोऽ२इति। (द्वे त्रिः)।
असीऽ२असि। असिहोऽ२असि। (द्वे त्रिः)। अरूरुचोदिवंपृथिवीम्। असीऽ२असि।
असिहोऽ२असि। (त्रीणि त्रिः)। पतिर। स्यपामोषधीनाऽ३म्। ओइ। पताइराऽ२३४सी।
(चत्वारि त्रिः)। चाइ। त्रंदेवानामुदगादनीकम्॥
वाइश्वेषान्देवाना२समिदजस्रंज्योतिराततऽ२म्। होइ। (द्वे त्रिः)। आयुर्यन्। (त्रिः)। अवः।
(त्रिः)। चक्षुर्मित्रस्यवरुणस्याग्नेः॥ सुवःस२सर्पस२सार्पा। (त्रिः)। जनावन२सुवाऽ२ःसुवः।

जनाऽ२वनाऽ२म्। सुवाऽ२ःसुवः। (त्रीणि त्रिः)। आप्राद्यावापृथिवीआन्तरीऽ२३क्षाऽ३म्।

सृपिप्रसृपीऐही। (त्रिः)। अस्तोषतस्वभानवाऐही। विप्रानविष्ठयामताऐही।

ग्रावाणोबर्हिषिप्रियाऐही। इन्द्रस्यरश्हियंबृहादेही। इन्द्राऽ२। स्यराऽ२। हियाऽ२म्।

बृहदिन्द्रस्यरश्हियंबृहादेही। (चत्वारि त्रिः)॥ सूर्यआत्माजगतस्तास्थूषाऽ२३श्चाऽ३।

अन्तश्चरतिरोचनाऐही। (त्रिः)। अस्यप्राणादपानताऐही। (त्रिः)। व्यख्यन्महिषोदिवामैही। (त्रिः)।

प्रोएतिप्रोएति। (त्रिः)। प्रोऽ। एति। (द्वे द्विः)। प्रोऽ२३। एताऽ२३४औहोवा॥ एऽ३।

देवादिवाज्योतीऽ२३४५ः॥

(दी. १६३। प. १०७। मा. ८९) १ (ठो।२७०)

॥ प्रथमः खण्डः॥१॥

(१६०।१)॥ गन्धर्वाप्सरसां आनंदप्रात्यानन्दौ द्वौ। (अतीषंगतृतीये सूर्यः) द्वयोस्सूर्यो गायत्री सूर्य॥

उविऽ२। (त्रिः)। हिगि। (त्रिः)। हिगिगि। (त्रिः)। आयङ्गौःपृश्निरक्रमीदेही। (त्रिः)॥

असदन्मातरंपुराऐही। (त्रिः)॥ पितरंचप्रयन्त्स्वाऐही। (त्रिः)। उविऽ२। (त्रिः)। हिगिऽ२। (त्रिः)।

हिगिगि। (त्रिः)॥

(दी. ३६। प. २७। मा. ६) २ (खू।२७१)

(१६०।२)

उवी। (त्रिः)। हिगी। (त्रिः)। हिगिगी। (त्रिः)। आयङ्गौःपृश्निरक्रमीदेही॥ असदन्मातरंपुराऐही॥

पितरंचप्रयन्त्स्वाऐही॥ उवी। (त्रिः)। हिगी। (त्रिः)। हिगिगी। (त्रिः)॥

(दी. १२। प. २१। मा. २) ३ (चा।२७२)

(१६१-१६२।११) ॥ सौर्यातीषङ्गः। उदुत्यंगायत्रीचित्रंस्त्रिष्टुप्सूर्यः॥

हाउ(३)। भ्राजाओवा। (त्रिः)। उदुत्यञ्जा। (त्रिः)। चित्रन्देवानामुदगादनीऽ२३काऽ३म्॥

हाउ(३)। भ्राजाओवा। (त्रिः)। तवेदसम्। (त्रिः)। चक्षुर्मित्रस्यवरुणास्यआऽ२३ग्नाऽ३इः॥

हाउ(३)। भ्राजाओवा। (त्रिः)। देवंवहा। (त्रिः)। आप्राद्यावापृथिवीआन्तरिऽ२३क्षाऽ३म्॥

हाउ(३)। भ्राजाओवा। (त्रिः)। तिकेतवः। (त्रिः)। सूर्यआत्माजगतस्तास्थुषाऽ२३श्चाऽ३॥

हाउ(३)। भ्राजाओवा। (त्रिः)। दृशेविश्वा। (त्रिः)। सूर्यआत्माजगतस्तास्थुषाऽ२३श्चाऽ३॥

हाउ(३)। भ्राजाओवा। (त्रिः)। यसूर्यम्। (द्विः)। यसूऽ२३रियाउ। वाऽ३॥ एऽ३।

देवादिवाज्योतीऽ२३४५ः॥

(दी. १३६। प. ५०। मा. ५४) ४ (आणी।२७३)

(१) ॥ इन्द्रस्य सधस्थम्। इन्द्रोऽनुष्टुप्सूर्यः॥

हाउहाउहाउ। सहोभ्राज। (द्विः)। सहोभ्राजा। पोभ्राजा। (द्विः)। पोभ्राज। अभ्राजीत्।

(त्रिः)। व्यभ्राजीत्। (त्रिः)। अदिद्युतत्। (त्रिः)। अदिद्युतद्विश्वंभूतंसहोबृऽ२हात्॥

अदिद्युतदभ्राट्प्राऽ२भ्राट्॥ अदिद्युतद्धर्मोअरूरूऽ२चात्॥ अदिद्युतद्धर्मउषसोअरोचाऽ२याः।

हाउ(३)। सहोभ्राज। (द्विः)। सहोभ्राजा। पोभ्राजा। (द्विः)। पोभ्राज। अभ्राजीत्। (त्रिः)।

व्यभ्राजीत्। (त्रिः)। अदिद्युतत्। (द्विः)। अदिद्युताऽ३त्। हाउवा॥ एः।

अदिद्युतद्धर्मोअरूरुचदुषसांदिविसूर्योविभातीऽ२३४५॥

(दी. ७४। प. ३९। मा. ३३) ५ (धि।२७४)

(१६३।१) ॥ मरुतां भूतिस्साम। मरुतो गायत्री सूर्यः॥

औहोऔहोवा। होइ। (द्वे द्विः)। औहोऔहोवा। हाऽ३१उ। वाऽ२३। भूऽ२३४वात्।
अन्तश्चरतिरोचना॥ औहोऔहोवा। होइ। (द्वे द्विः)। औहोऔहोवा। हाऽ३१उ। वाऽ२३।
जाऽ२३४नात्। अस्यप्राणादपानती॥ औहोऔहोवा। होइ। (द्वे द्विः)। औहोऔहोवा।
हाऽ३१उ। वाऽ२३। वाऽ२३४र्द्धात्। व्यख्यन्महिषोदिवम्॥ औहोऔहोवा। होइ। (द्वे द्विः)।
औहोऔहोवा। हाऽ३१उ। वाऽ२३। काऽ२३४रात्। औहोऔहोवा। होइ। (द्वे द्विः)।
औहोऔहोवा। हाऽ३१उ। वाऽ२३। भूऽ२३४तीः। औहोऔहोवा। होइ। (द्वे द्विः)।
औहोऔहोवा। हाऽ३१उ। वाऽ२॥ अभ्राजीज्ज्योतिरभ्राजीत्॥ औहोऔहोवा। होइ। (द्वे
द्विः)। औहोऔहोवा। हाऽ३१उ। वाऽ२३॥ एऽ३। सर्वान्कामानशीमहीऽ२३४५॥

(दी. १२१। प. ६०। मा. ४९) ६ (ङो।२७५)

(१६४।१)॥ सर्पराज्ञ्यानि (सार्पराजानो वाआ) त्रीणि। प्रजापतिर्गायत्री सूर्यः॥

हाउहाउहाउवा। ईन्दूः। भ्राजाओवा। (त्रिः)। आयङ्गौःपृश्निरक्रमीदेही॥ हाउ(३)वा। ईडा।
भ्राजाओवा। (त्रिः)। असदन्मातरंपुराऐही॥ हाउ(३)वा। सात्यम्। भ्राजाओवा। (त्रिः)।
पितरंचप्रयन्त्स्वाऐही॥ हाउ(३)वा॥ दीयौः॥

(दी. ४८। प. २०। मा. २२) ७ (णू।२७६)

(१६५।१)

हाउ(३)वा। भूतम्। भ्राजाओवा। (त्रिः)। अन्तश्चरतिरोचनाऐही॥ हाउ(३)वा। पृथिवी।

भ्राजाओवा। (त्रिः)। अस्यप्राणादपानताऐही॥ हाउ(३)वा। साहः। भ्राजाओवा। (त्रिः)।

व्यख्यन्महिषोदिवामैही॥ हाउ(३)वा॥ तेजः॥

(दी. ५१। प. २०। मा. २६) ८ (ङू।२७७)

(१६६।१)

हाउ(३)वा। आपः। भ्राजाओवा। (त्रिः)। त्रिꣳशद्धामविराजताऐही॥ हाउ(३)वा। ऊषा।

भ्राजाओवा। (त्रिः)। वाक्पतङ्गायधीयताऐही॥ हाउ(३)वा। दीक्षः। भ्राजाओवा। (त्रिः)।

प्रतिवस्तोरहद्युभाऐही॥ हाउ(३)वा॥ ज्योतिः॥

(दी. ५१। प. २०। मा. २७) ९ (ङे।२७८)

(१) ॥ सर्पस्य घर्मरोचनमिन्द्रस्य वा। घर्मो (सर्पो)ऽनुष्टुप्सूर्यः॥

उवँल्लोकानरोचयः। होइ॥ इमाँल्लोकानरोवयः। होइ॥ प्रजाभूतमरोचयः। होइ॥

विश्वंभूतमरोचयः। होऽ२हाऽ२३४औहोवा॥ घर्म्मोज्योतीऽ२३४५ः॥

(दी. १६। प. ९। मा. ९) १० (ग़्हो।२७९)

(१६७-६९।१)॥ षडैन्द्राः परिधय ऋतूनांण् प्रथमं। इन्द्रो गायत्री सुज्यः॥

हाउ(३)। भ्राजाओवा। (त्रिः)। दिदीहिविश्वतस्पृथुः। उदुत्यंजातऽ३वाइदाऽ१साऽ२म्॥

देवंवहन्तिऽ३काइताऽ१वाऽ२ः॥ दृशेविश्वायऽ३सूराऽ१याऽ२म्॥ श्री॥

अपत्येतायऽ३वोयाऽ१थाऽ२। नक्षत्रायन्तिऽ३याक्तूऽ१भाऽ२इः॥

सूरायविश्वऽ३चाक्षाऽ१साऽ२इ। श्री॥ अदृश्रन्नस्यऽ३काइताऽ१वाऽ२ः॥

विरश्मयोजऽ३ना२आऽ१नूऽ२॥ भ्राजन्तोअग्नऽ३योयाऽ१थाऽ२३। हाउ(३)। भ्राजाओवा।

(द्विः)। भ्राजाऽ३ओऽ५वाऽ६५६॥ ईऽ२३४५॥

(दी. ४०। प. १९। मा. २५) ११ (भ्रु।२८०)

॥ द्वितीयः खण्डः॥२॥

(१६७-६९।२)

हाउ(३)। शुक्राओवा। (त्रिः)। दिदीहिविश्वतस्पृथुः। उदुत्यंजातऽ३वाइदाऽ१साऽ२म्॥

देवंवहन्तिऽ३काइताऽ१वाऽ२ः॥ दृशेविश्वायऽ३सूराऽ१याऽ२म्॥ श्री॥

अपत्येतायऽ३वोयाऽ१थाऽ२॥ नक्षत्रायन्तिऽ३याक्तूऽ१भाऽ२इः॥

सूरायविश्वऽ३चाक्षाऽ१साऽ२इ॥ श्री॥ अदृश्रन्नस्यऽ३काइताऽ१वाऽ२ः॥

विरश्मयोजऽ३ना२आऽ१नूऽ२॥ भ्राजन्तोअग्नऽ३योयाऽ१थाऽ२३। हाउ(३)। शुक्राओवा।

(द्विः)। शुक्राऽ३ओऽ५वाऽ६५६॥ ईऽ२३४५॥

(दी. ३४। प. १९। मा. ४५) १२ (ध्रु।२८१)

(१७०-७२।३)

हाउ(३)। भूताओवा। (त्रिः)। दिदीहिविश्वतस्पृथुः। तरणिर्विश्वऽ३दार्शाऽ१ताऽ२ः॥

ज्योतिष्कृद्इदसिऽ३सूराऽ१याऽ२॥ विश्वमाभासिऽ३रोचाऽ१नाऽ२म्॥ श्री॥

प्रत्यङ्देवाऽ३नाम्वाऽ१इशाऽ२ः॥ प्रत्यङ्ङुदेषिऽ३मानूऽ१षाऽ२न्॥

प्रत्यङ्विश्व२सुऽ३वार्दृऽ१शाऽ२इ॥ श्री॥ येनापावकऽ३चाक्षाऽ१साऽ२॥

भुरण्यन्तंजऽ३ना२ॅआऽ१नूऽ२॥ त्वंवरुणऽ३पाश्याऽ१साऽ२३इ। हाउ(३)। भूताओवा। (द्विः)।

भूताऽ३ओऽ५वाआऽ६५६॥ ईऽ२३४५॥

(दी. ३७। प. १९। मा. २१) १३ (झ।२८२)

(१७९-७२।४)

हाउ(३)। तेजाओवा। (त्रिः)। दिदीहिविश्वतस्पृथुः। तरणिर्विश्वऽ३दार्शाऽ१ताऽ२ः॥

ज्योतिष्कृदसिऽ३सूराऽ१याऽ२॥ श्री॥ विश्वमाभासिऽ३रोचाऽ१नाऽ२म्॥ श्री॥

प्रत्यङ्देवाऽ३नांम्वाऽ३इशाऽ२ः॥ प्रत्यङ्ङुदेषिऽ३मानूऽ१षाऽ२न्॥

प्रत्यङ्विश्व२ॅसुऽ३वार्दृऽ१शाऽ२इ॥ श्री॥ येनापावकऽ३चाक्षाऽ१साऽ२।

भुरण्यतंजऽ३ना२ॅआऽ१नूऽ२॥ त्वंवरुणऽ३पाश्याऽ१साऽ२३इ। हाउ(३)। तेजाओवा। (द्विः)।

तेजाऽ३ओऽ५वाऽ६५६॥ ईऽ२३४५॥

(दी. ३७। प. १९। मा. २१) १४ (झ।२८३)

(१७३-७५)

हाउ(३)। सत्यओवा। (त्रिः)। दिदीहिविश्वतस्पृथुः। उद्यामेषिरऽ३जाःपाऽ१र्थूऽ२॥

अहामिमानोऽ३आक्तूऽ१भाऽ२इः॥ पश्यंजन्मानिऽ३सूराऽयाऽ२॥ श्री॥

अयुक्तसप्तऽ३शून्ध्यूऽ१वाऽ२ः। सूरोरथस्यऽ३नाप्त्राऽ१याऽ२ः॥

ताभिर्यातिस्वऽ३यूक्ताऽ१इभीऽ२ः॥ श्री॥ सप्तत्वाहरिऽ३तोराऽ१थाऽ२इ॥

वहन्तिदेवऽ३सूराऽ१याऽ२॥ शोचिष्केशंविऽ३चाक्षाऽ१णाऽ२३। हाउ(३)। सत्याओवा। (द्विः)।

सत्याऽ३ओऽ५वाऽ६५६॥ ईऽ२३४५॥

(दी. ३६। प. १९। मा. २१) १५ (घ्र।२८४)

(१७३-७५।६)

हाउ(३)। ऋताओवा। (त्रिः)। दिदीहिविश्वतस्पृथुः। उद्यामेषिरऽ३जाःपाऽ१र्थूऽ२॥

अहामिमानोऽ३आक्तूऽ१भाऽ२इः॥ पश्यंजन्मानिऽ३सूराऽ१याऽ२॥ श्री॥

अयुक्तसप्तऽ३शून्ध्यूऽ१वाऽ२ः॥ सूरोरथस्यऽ३नाप्त्राऽ१याऽ२ः॥

ताभिर्यातिस्वऽ३यूक्ताऽ१इभीऽ२ः॥ श्रीः॥ सप्तत्वाहरिऽ३तोराऽ१थाऽ२इ॥

वहन्तिदेवऽ३सूराऽ१याऽ२॥ शोचिष्केशंविऽ३चाक्षाऽ१णाऽ२३। हाउ(३)। ऋताओवा। (द्विः)।

ऋताऽ३ओऽ५वाऽ६५६॥ ईऽ२३४५॥

(दी. ३६। प. १९। मा. २१) १६ (ग्घ्र।२८५)

(१) ॥ वागादिपित्र्यंसाम (वाङ्मनः) ऋतवोऽनुष्टुप्सूर्यः॥

वाक्॥ मनःप्राणःप्राणोपानोव्यानश्चक्षुःश्रोत्रꣳशर्मवर्मभूतिःप्रतिष्ठा। आदित्यःपित्र्यम्। (त्रिः)।

आयुःपित्र्यम्। (त्रिः)॥

(दी. १५। प. ८। मा. ७) १७ (बे।२८६)

(१) ॥ चक्षुस्साम। मित्रावरुणौ गायत्री सूर्यः॥

अन्तर्देवेषुऽ३रोचाऽ१साऽ२इ। (त्रिः)। अन्तश्चरतिऽ३रोचाऽ१नाऽ२॥

अस्यप्राणादऽ३पानाऽ१ताऽ२इ॥ व्यख्यन्महिऽ३षोदाऽ१इवाऽ२म्॥

अन्तर्देवेषुऽ३रोचाऽ१साऽ२इ। (द्विः)। अन्तर्देवेषुऽ३रोऽ२३। चाऽ२। साऽ२३४। औहोवा॥

एऽ३। देवादिवाज्योतीऽ२३४५ः॥

(दी. २०। प. १४। मा. ९) १८ (भो।२८७)

(१७६-७७।१)॥ श्रोत्रꣳसाम। मित्रावरुणयोर्द्वितीयोऽतीषंग। उदुत्यं गायत्रीचित्रंत्रिष्टुप्सूर्यः॥

२र र १ र २ र १ र २ १ २ र १ र २
हाउ(३)। भ्राजाभ्राज। (त्रिः)। आयूरायुः। (त्रिः)। उदुत्यंजा। (त्रिः)। तवेदसम्। (त्रिः)।

१ र र र अ २ २र र १ र २ र १ र २
चित्रन्देवानामुदगादनीऽ२३काऽ३म्॥ हाउ(३)। भ्राजाभ्राज। (त्रिः)। आयूरायुः। (त्रिः)।

१र २ र १ अ २ २र र १ र २
देवंवहा। (त्रिः)। चक्षुर्मित्रस्यवरुणास्यआऽ२३ग्नाऽ३इः॥ हाउ(३)। भ्राजाभ्राज। (त्रिः)।

र १ र २ १ र २ १र र र र र अ २ २र
आयूरायुः। (त्रिः)। तिकेतवः। (त्रिः)। आप्राद्यावापृथिवीआन्तरीऽ२३क्षाऽ३म्॥ हाउ(३)॥

र १ र २ र १ र २ १ र २र
भ्राजाभ्राज। (त्रिः)। आयूरायुः। (त्रिः)। दृशेविश्वा। (त्रिः)।

१र र र अ २ २र र १ र २ र १ र २
सूर्यआत्माजगतस्तास्थुषाऽ२३श्वाऽ३। हाउ(३)। भ्राजाभ्राज। (त्रिः)। आयूरायुः। (त्रिः)।

१ र २ १ २ ^ २ २र १र र १र ३ १ १ १
यसूर्यम्। (द्विः)। यसूऽ२३रियाउ। वाऽ३॥ एऽ३। देवादिवाज्योतीऽ२३४५ः॥

(दी. ११३। प. ६०। मा. ४७) १९ (णो।२८८)

(१) ॥ इन्द्रस्य शिरस्साम। त्र्इतीयेऽतीषंग इन्द्रो गायत्री त्रिष्टुप्सूर्यः॥

२र ३र २र ३र र २ र ऽ १ २
हाउ(३)। भ्राजाओवा। (त्रिः)। उदुत्यंजा। (त्रिः)। हाउ(३)वा। आर्चिः।

१ र र अ २ २र ३र २र ३र र २ र
इन्द्रन्नरोनेमधिताहवाऽ२३०ताऽ३इ॥ हाउ(३)। भ्राजाओवा। (त्रिः)। तवेदसम्। (त्रिः)।

ऽ १ २ र ३र २र ३र र २र र ऽ १ २
हाउ(३)वा। शोचिः। हाउ(३)। भ्राजाओवा। (त्रिः)। देवंवहा। (त्रिः)। हाउ(३)वा। तापः।

१ र र २ २र ३र २र ३र र २ र
यत्पार्यायुनजताइधियाऽ२३स्ताऽ३ः॥ हाउ(३)। भाजाओवा। (त्रिः)। तिकेतवः। (त्रिः)।

ऽ १ २ र ३र २र ३र र २ र र ऽ १ २
हाउ(३)वा। हारः। हाउ(३)। भ्राजाओवा। (त्रिः)। दृशेविश्वा। (त्रिः)। हाउ(३)वा। साहः।

१र र र र अ २ २र ३र २र ३र र २ र
शूरोनृषाताश्रवसाश्चकाऽ२३माऽ३इ॥ हाउ(३)। भ्राजाओवा। (त्रिः)। यसूर्यम्। (त्रिः)।

ऽ १ २ र ३र २र ३र र २ र र ऽ १ _
हाउ(३)वा। नारः। हाउ(३)। भ्राजाओवा। (त्रिः)। दृशेविश्वा। (त्रिः)। हाउ(३)वा। भाऽ२ः।

आगोमतिव्रजेभजातुवाऽ२३न्नाऽ३ः। हाउ(३)। भ्राजाओवा। (त्रिः)। यसूर्यम्। (त्रिः)।

हाउ(३)वाऽ३॥ ईऽ२३४५॥

(दी. १६४। प. ७६। मा. ९६) २० (त्रू।२८९)

(१) ॥ आदित्यस्योन्नयादित्यात्मा। आदित्योऽनुष्टुबादित्यात्मा॥

उन्नयामि। होइ॥ (द्वे त्रिः)। आदित्यंप्राश्चंयन्तमुन्नयामि। होइ। (द्वे त्रिः)। अहोरात्राण्यरित्राणि।

होइ। (द्वे त्रिः)। द्यौर्नौर्हाउ। तस्यामसावादित्यईयतेहाउ। (त्रिः)।

तस्मिन्वयमीयमानईयामहेहाउ॥ (त्रिः)। ईयामहेहाउ। (द्विः)॥ ईयामहेऽ३। हाउ(३)वा॥

प्रियेधामश्स्त्रियक्षरे। (द्विः)। प्रियेधामश्स्त्रियक्षरेऽ२३४५॥

(दी. ६५। प. ३४। मा. २७) २१ (भे।२९०)

[शुक्रियपर्वणि ४० सामानि]

॥दशतृतीयः खण्डः॥३॥

इति (ग्रामे) आरण्यकगाने षष्ठः प्रपाठकः॥६॥

॥ इति शुक्रिय नाम चतुर्थं पर्व सामाप्तम्॥

॥ इति षष्ठं गानं समाप्तम्॥

॥ इति गेयगानम्॥

॥ अथ महानाम्न्यार्चिकः॥

(१) ॥ महानाम्नी साम। इन्द्रो विराडिन्द्रः, इन्द्रः शक्वरीन्द्रः॥

एऽ२। विदामघवन्विदाः॥ गातुमनुशꣳसिषः। दाइशाऽ३१उवाऽ२३। ईऽ३४डा॥ एऽ२।

शिक्षाशचीनाम्पताइ॥ पुर्वीणाम्पूरूऽ२। वसाऽ३१उवाऽ२३। ईऽ३४डा। आभिष्ट्वमभाऽ२इ।

ष्टिभिराऽ३१उवाऽ२३। ईऽ३४डा। स्वर्न्नाꣳशूऽ२ः। हाऽ३१उवाऽ२३। ईऽ३४डा। प्रा।

चेतनप्रचेतया॥ ईन्द्रा॥ द्युम्नायनाऽ२इषाइ। इडा॥ ईन्द्रा॥ द्युम्नायनाऽ२इषाइ। अथा॥ ईन्द्रा॥

द्युम्नायनाऽ२इषाइ। इडा। एवाहिशक्रोरायेवाजायवाऽ१ज्रीऽ३वाः। शविष्ठवज्रिनाऽ३।

जासाइ॥ मꣳहिष्ठवज्रिन्नाऽ२३हो॥ जासाऽ३१उवाऽ२३॥ इट्स्थिइडाऽ२३४५॥ आया।

हिपिबमाऽ२त्सुवा॥ इडाऽ२३४५॥

(दी. २२। प. ३६। मा. २०) १ (चौ।१)

(२)

एऽ२। विदारायेसुवीरियाम्॥ भुवोवाजानाम्पतिर्वशाऽ२ꣳ। अनुआऽ३१उवाऽ२३। ईऽ३४डा॥

एऽ२। मꣳहिष्ठवज्रिन्नृञ्जसाइ। यःशविष्ठःशूराऽ२। णाऽ३१उवाऽ२३। ईऽ३४डा॥

योमꣳहिष्ठोमघोऽ२। नाऽ३१उवाऽ२३। ईऽ३४डा॥ अꣳशुर्नशोचाऽ२इः। हाऽ३१उवाऽ२३।

ईऽ३४डा। चाइ। किबोअभिनोनया॥ ईन्द्रो॥ विदेतमूऽ२स्तुहाइ। इडा॥ ईन्द्रो॥

विदेतमूऽ२स्तुहाइ। अथा॥ ईन्द्रो। विदेतमूऽ२स्तुहाइ। इडा।

इशेहिशक्रस्तमूतयेहवाऽ१माऽ३हाइ।। जेतारमपराऽ३। जाइताम्॥ सनःस्वर्षदताऽ२३होइ॥

द्वाइषाऽ३१उवाऽ२३॥ इट्स्थिइडाऽ२३४५॥ क्रातूः॥ छन्दऋताऽ२म्बृहात्॥ इडाऽ२३४५॥

(दी. २३। प. ३५। मा. २४) २ (टी।२)

(३)

एऽ२। इन्द्रन्धनस्यसातया॥ हवामहेजेतारमपराऽ२। जितमाऽ३१उवाऽ२३। ईऽ३४डा॥

एऽ२। सनःस्त्वर्षदतिद्विषाः॥ सानःस्त्वर्षदताऽ२इ। द्विषआऽ३१उवाऽ२३। ईऽ३४डा।

पूर्वस्ययत्तआऽ२। दिव्रआऽ३१उवाऽ२३। ईऽ३४डा। अ२शुर्मदायाऽ२। हाऽ३१उवाऽ२३।

ईऽ३४डा। सू। म्नआधेहिनोवसाउ। पूर्त्तीः॥ श्रविष्ठश्राऽ२स्यताइ। इडा॥ पूर्तीः॥

श्रविष्ठश्राऽ२स्याताइ। अथा॥ पूर्त्तीः॥ श्रविष्ठश्राऽ२ऽस्यताइ। इडा।

वशीहिशक्रोनूनन्तन्नव्य२साऽ१न्याऽ३साइ। प्रभोजनस्यवाऽ३। त्राहान्॥ समर्येषुब्रुवाऽ२३होइ॥

वाहाऽ३१उवाऽ२३॥ इट्स्थिइडाऽ२३४५॥ शूरो॥ योगोषुगाऽ२च्छताइ॥ इडा॥ साखा॥

सुश्रेवोऽ२द्वयूः॥ इडाऽ२३४५॥

(दी. १८। प. ३९। मा. २५) ३ (ढु।३)

॥ अथ पञ्च पुरीषपदानि॥

(४)

आइवा॥ हियेवाऽ२३४५। होइ॥ हो। वाहाऽ३१उवाऽ२३॥ ईऽ३४डा॥ आइवा॥

हियग्नाऽ२३४५इ। होइ॥ हो। वाहाऽ३१उवाऽ२३॥ ईऽ३४डा॥ आइवा॥ हिइन्द्राऽ२३४५।

होइ॥ हो। वाहाऽ३१उवाऽ२३॥ ईऽ३४डा॥ आइवा॥ हिपुषाऽ२३४५न्। होइ॥ हो।

वाहाऽ३१उवाऽ२३॥ ईऽ३४डा॥ आइवा॥ हिदेवाऽ२३४५ः। होइ॥ हो।

वाहाऽ३१उवाऽ२३॥ ईऽ३४डा॥

(दी. ८। प. ३०। मा. १९) ४ (णो।४)

॥ इति पञ्च पुरीषपदानि॥

(१) ॥ उद्वयामेकं साम॥

उद्वयाऽ६मे॥ तमऽ३सास्पराऽ२इ। ज्योतिःपश्यन्ताउत्तराऽ२म्॥ स्वःपश्यन्ताउत्तराऽ२म्॥

देवंदेवत्रासूराऽ२याऽ२३४औहोवा॥ अगन्मज्योतिरुत्तमाऽ१म्॥

(दी. ८। प. ६। मा. ७) ५ (टे।५)

(१)

तत्सवितुर्वरेण्योम्॥ भर्गोदेवस्यधीमाहीऽ२। धियोयोनःप्रचोऽ१२१३॥ हिम्०स्थिआऽ२। दायो॥

आऽ३४५॥

(दी. ६। प. ६। मा. २) ६ (का।६)

॥ अथ भारुण्ड साम॥

हाउ(३)। ऊऽ२वदः। (त्रिः)। वदोवदः। (त्रिः)। वदोनृम्णानिपुरायः। (त्रिः)। यमोहाउ। (त्रिः)।

पितरोहाउ। (त्रिः)। भारुण्डोहाउ। (त्रिः)। इमꣳस्तोमाम्। अर्हातेजा। तावेदसहोयेऽ३।

होयेहोये॥ हाउ(३)। ऊऽ२वदः। (त्रिः)। वदोवदः। (त्रिः)। वदोनृम्णानिपुरायः। (त्रिः)।

यमोहाउ। (त्रिः)। पितरोहाउ। (त्रिः)। भारुण्डोहाउ। (त्रिः)। रथामिवा। संमाहेमा।

मानीषयहोयेऽ३। होयेहोये॥ हाउ(३)। ऊऽ२वदः। (त्रिः)। वदोवदः (त्रिः)।

वदोनृम्णानिपुरायः। (त्रिः)। यमोहाउ। (त्रिः)। पितरोहाउ। (त्रिः)। भारुण्डोहाउ। (त्रिः)।

भद्राहिनाः। प्रमातिरा। स्यासꣳसदहोयेऽ३। होयेहोये॥ हाउ(३)। ऊऽ२वदः। (त्रिः)।

वदोवदः। (त्रिः)। वदोनृम्णानिपुरायः। (त्रिः)। यमोहाउ। (त्रिः)। पितरोहाउ। (त्रिः)।
भारुण्डोहाउ। (त्रिः)। अग्नाइसख्याइ। माराइषामा। वायंतवहोयेऽ३। होयेहोये॥ हाउ(३)।
ऊऽ२वदः। (त्रिः)। वदोवदः। (त्रिः)। वदोनृम्णानिपुरायः। (त्रिः)। यमोहाउ। (त्रिः)।
पितरोहाउ। (त्रिः)। भारुण्डोहाउ। (द्विः)। भारुण्डोऽ३हाउ। वा॥ ए।
वदोवदोनृम्णानिपुराययमोवःपितरोभारुण्डः। ए। वदोवदोनृम्णानिपुराययमोवःपितरोभारुण्डः।
ए। वदोवदोनृम्णानिपुराययमोवःपितरोभारुण्डाऽ२३४५ः॥

(दी. १५४। प. ११८। मा. ११३) ७ (दि।७)

[आरण्यकगान सामसंख्या २९०]

॥ इत्यारण्यकगाने भारुण्डेनसह महानाम्नी सप्तमं गानं समाप्तम्॥

॥ इति आरण्यकगानं समाप्तम्॥

॥ अथ भारुण्डस्य पाठान्तरम्॥

उद्वयाम्। तमसस्पारीऽ२। ज्योतिःपश्यन्तउत्तराऽ२म्। स्वःपश्यन्तउत्तराऽ२म्।
देवन्देवत्राऽ२सूऽ२३४रीम्। अगन्मज्योतिरुत्तमाऽ१म्। स्वसारः। आतोतुनआतोतूऽ३४।
औहोवा। ओऽ२वातः। (त्रिः)। वातोवातः। (द्विः)। वातोनृम्णानिपूऽ३याः। यमोहाउ। (त्रिः)।
पितरोहाउ। (त्रिः)। भारुण्डोहाउ। (त्रिः)। इमाꣳस्तोऽ२३४माम्। अर्हातेऽ२३४जा।
तावेदसेऽ३। होइ। होइयेऽ३। (त्रिः)। होइये। (त्रिः)। उऽ२वातः। (त्रिः)। वातोवातः। (द्विः)।
वातोनृम्णानिपुराऽ३याः। यमोहाउ। (त्रिः)। पितरोहाउ। (त्रिः)। भारुण्डोहाउ। (त्रिः)।
रथामीऽ२३४वा। सम्माहेऽ२३४मा। मानीषया। (त्रिः)। होइ। होइयेऽ२। (त्रिः)। होइये।

(त्रिः)। उऽ२वातः। (द्विः)। वातोवातः। (द्विः)। वातोनृम्णानिपुराऽ३याः। यमोहाउ। (त्रिः)।
पितरोहाउ। (त्रिः)। भारुण्डोहाउ। (त्रिः)। भद्राहीऽ२३४नाः। प्रमातीऽ२३४रा।
स्यासꣳसदेऽ३। होइ। होइयेऽ३ (त्रिः)। होइये। (त्रिः)। उऽ२वातः। (त्रिः)। वातोवातः।
(द्विः)। वातोनृम्णानिपुराऽ३याः। यमोहाउ। (त्रिः)। पितरोहाउ। (त्रिः)। भारुण्डोहाउ। (त्रिः)।
अग्नाइसाऽ२३४ख्याइ। माराइषाऽ२३४मा। वायन्तवाऽ३। होइ। होइयेऽ३। (त्रिः)।
होइये। (त्रिः)। उऽ२वातः। (त्रिः)। वातोवातः। (द्विः)। वातोनृम्णानिपूऽ३याः। यमोहाउ।
(त्रिः)। पितरोहाउ। (त्रिः)। भारुण्डोहाउ। (त्रिः)। भारुण्डाऽ३४औहोवा। ए।
वातोनृम्णानिपुरायद्यमःपितरोभारुण्डः। (द्विः)। ए। वातोनृम्नानिपुरयद्यमःपितरोभारुण्डाऽ२।
ईऽ२३४५॥ १॥

ॐ नमस्सामवेदाय।

अथ शखान्तरस्थं तवश्यावीयं साम॥

हरिः ॐ

ॐ हꣳऽ२३४५। ओंभूः। ओंभूमिर्द्दिवमन्तरिक्षम्। ओंभुवः। ओंऋचोयजुꣳषिसामानि।
ओंभार्गोदेवस्यधीमाहीऽ२३४५। ओंस्वः। ओंप्राणोपानोव्यानःसमानउदानः।
ओंधियोयोनःप्रचोऽ२३४५। ओंमहः। ओंजनः। ओंतपः। ओंसत्यम्। ओंपुरुषाः।
ओंपरोरजोअमृतोम्। ओंहꣳऽ२३४५। हिम्। आऽ२। दायो। आऽ२३४५।
ओंभूमिरन्तरिक्षन्द्यौः। ओंतत्सवितुर्वरेणियोम्। ओंऊऽ२र्के। हाउ(३)। होऽ३वाक्।
ओंबह्मोओयजोअमृतोम्। ओंऊऽ२र्के। हाउ(३)। होऽ३वाक्। (त्रिः)।

ओंप्राणोपानौ(नो)व्यानोसमानउदानः। धियोयोनःप्रचोऽ२३४५। ओंऊऽ२र्के। हाउ(३)।
होऽ३वाक्। (त्रिः)। धर्मोऽ२धर्मः। (त्रिः)। धर्मविधर्म। (त्रिः)। सत्यङ्गाय। (त्रिः)। ऋतंवद।
(त्रिः)। हꣳवंवऽ२म्। वंवऽ२म्। वम्। (त्रिः) ॥१॥

॥ इति तवश्यावीयं साम समाप्तम्॥